५९. श्रीमते भगवन्नाम-बोध-इन्द्रसरस्वत्यै नमः
६०. श्रीमते अद्वैतात्मप्रकाश-इन्द्रसरस्वत्यै नमः
६१. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
६२. श्रीमते शिवगीतिमाला-चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६३. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
६४. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६५. श्रीमते सुदर्शन-महादेव-इन्द्रसरस्वत्यै नमः
६६. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६७. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
६८. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६९. श्रीमते जयेन्द्रसरस्वत्यै नमः
७०. श्रीमते शङ्करविजयेन्द्रसरस्वत्यै नमः

श्री-शङ्कर-विजयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, नानाविधपरिमलपत्रपुष्पाणि समर्पयामि।
श्री-शङ्कर-विजयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, धूपमाघ्रापयामि।
श्री-शङ्कर-विजयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, दीपं दर्शयामि।
श्री-शङ्कर-विजयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, अमृतं महानैवेद्यं पानीयं च निवेदयामि। निवेदनानन्तरम् आचमनीयं समर्पयामि।
श्री-शङ्कर-विजयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, कर्पूरताम्बूलं समर्पयामि।
श्री-शङ्कर-विजयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, मङ्गलनीराजनं दर्शयामि।
श्री-शङ्कर-विजयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, प्रदक्षिणनमस्कारान् समर्पयामि।
श्री-शङ्कर-विजयेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, प्रार्थनाः समर्पयामि।

## ॥ स्वस्ति-वचनम् ॥

- स्वस्ति श्रीमद्-अखिल-भूमण्डलालङ्कार-त्रयस्त्रिंशत्-कोटि-देवता-सेवित-श्री-कामाक्षी-देवी-सनाथ-श्रीमद्-एकाम्रनाथ-श्री-महादेवी-सनाथ-श्री-हस्तिगिरिनाथ-साक्षात्कार-परमाधिष्ठान-सत्यव्रत-नामाङ्कित-काञ्ची-दिव्य-क्षेत्रे शारदामठ-सुस्थितानाम्

